IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)

An International Open Access, Peer-reviewed, Refereed Journal

# पद्मपुराणे त्रिपुरासुरसंहारकथा - एकमध्ययनम्

**(Padmapurane tripurasurasamharakatha ekamadhyayanam)**

**CH. DURGA SYAM PRASAD,** Sanskrit Research Scholar,

Dept. of Telugu & Oriental Languages, Acharya Nagarjuna University,

Nagarjuna Nagar, Guntur, Andhra Pradesh.

**शोधपत्रसारः - [ABSTRACT]**

पुरा नवं भवति इति पुराणम् । पुराणशब्दस्य प्राचीनमित्यर्थः । प्राक् विद्यारूपं पुराणम्। ततो ग्रन्थात्मकं बभूव । पुराणेतिहासयोः यद्यपि विषयप्रतिपादने भेदः नास्ति तथापि एकनायकाश्रयः इतिहास इति तयोर्भेदः लक्ष्यते । शास्त्रपुराणानि तावत् मित्रसम्मितानि । तत्र इदमेव कार्यमिति विधिर्न दृश्यते । उपदेशमात्रं दृश्यते। आचरणे च श्रोतुः स्वेच्छा भवति। पुराणानि भारतीयसंस्कृतेः पुरातनं स्वरूपं प्रकाशयन्ति, वेदार्थं च कथा – आख्यानादिरुपेण विशदयन्ति, प्राचीनम् इतिहासम् अज्ञातं चापि ऐतिह्यं प्रकाशतम् आपादयन्ति। एवं भारतीयैतिह्यज्ञानाय, प्राचीनभौगोलिकविवरणज्ञानाय, विविधशास्त्राणां च सारज्ञानाय पुराणानां महत्वं न केनापि निराकर्तुं शक्यते। पुराणानि अष्टादशैवेति प्रसिद्धिः।

पुराणानां नामान्यपि एकस्मिन्नेव श्लोके संक्षिप्तानि प्रसिद्धानि च । देवीभागवते प्रथमस्कन्धे एष श्लोकः दृश्यते ।

मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम् ।
अनापलिङ्गकूस्कानि पुराणानि पृथक् पृथक् ॥[1]

अष्टादशपुराणेषु पद्मपुराणस्य स्थानं महदुत्कृष्टमस्ति । पद्मपुराणे कथितं त्रिपुरासुरसंहरकथा यथामति अस्मिन् शोधपत्रे मया परिशीलिताः ।

**मुख्यांशाः – (Key words)**

1. भीष्म पुलस्त्य संवादः, 2. सृष्टिखण्डे गणेशमाहात्म्य वर्णने त्रिपुरासुर सङ्ग्रामकथा प्रस्तावः दृश्यते, 3. स्वर्गखण्डे ज्वालेश्वरतीर्थोत्पत्तिवर्णने त्रिपुरदाहकथा वर्णिता, 4. परमेश्वर नारद संवादः, 5. शिवस्य रथवर्णनम् 6. त्रिपुरस्त्रीणां शीलभ्रंशकारणेन तत्रस्थानां राक्षसानां तेजः बलं च विशीर्णमासीत्, 7. त्रिपुरस्त्रियः धूमपीडिताः अग्निमेव निनिन्दुः, 8. बाणेन कृता ईश्वरस्तुतिः, 9. महेश्वरः बाणाय दीर्घायुषं दत्वा दहनव्यापारात् अग्निं निवर्तयामास, 10. ज्वालेश्वरमाहात्म्यवर्णनम्।

## प्रस्तावना

"कृतमन्वेति कर्तारं पुराकर्म द्विजोत्तम"। "पुरा नवं भवति" इति पुराणम् । मनुजेन कृतं सुकृतं दुष्कृतं च जन्मनि जन्मनि छायेव अनुसरति इति पुराणानि सदृष्टान्तं सोपपत्तिकं च निरूपयन्ति । पापभूयिष्ठेऽस्मिन् कलौ युगे दृष्कृतात् निवृत्यर्थं कर्तव्ये च प्रवर्तयितुं च पुराणानि सर्वथा सर्वदा च मार्गदर्शकानि विराजन्ते।

अतः आधुनिककालेऽपि अकर्तव्यात् निवारयितुं समीचीने पथि प्रवर्तयितुं च पुराणानि उपादेयताम् उपयान्ति । अज्ञानावृतचेतसः जनाः तात्कालिकसुखावाप्तये सौकर्योपलब्धिषु रमन्ते । तादृशान् कुटिलान् नीचान् साधुमार्गे आनेतुं पुराणेषु विद्यमानाः प्रायश्चित्तोपायाः तन्निवारकोपायाश्च अवश्यं ज्ञापनीयाः ।

पुराणानि वेदसम्मितानीति आर्षं मतम् । वेदार्थपूरणात् पुराणमित्यपि प्रसिद्धम्। लौकिकेषु वैदिकेषु च कर्मसु बहवः पुराणगतश्लोकाः नित्यजीवने उपयुज्यन्ते। किं बहुना सन्ध्यावन्दनादिक्रियायां सूर्योपासनानन्तरं नारायणप्रार्थनादि श्लोकाः पुराणस्था एव अस्माभिराद्रियन्ते ।

भारतीयसंस्कृतेः परिशीलनार्थं पुराणानां पारायणं परमावश्यकं विद्यते ।

पद्मपुराणे अपि त्रिपुरासुरवृत्तान्ते आधुनिककाल उपयुक्ताः अनेकांशाः दृश्यन्ते। तानि यथामति परिशीलनमेव मदीय शोधपत्रस्य प्रधानोद्देश्यः ।

### 1. भीष्म पुलस्त्य संवादः

सृष्टिखण्डे त्रयोदशे अध्याये भीष्मपुलस्त्यसंवादे त्रिपुरासुरकथा सूचिता। पुलस्त्यः भीष्मं हरेः वृत्तान्तं श्रावयन् एतावत् पर्यन्तं द्वादशकृत्वः विष्णुः देवान् रक्षितवान् । प्रतिमन्वन्तरम् एकवारमिति अद्यावधि कल्पभेदेन द्वादशावताराः हरेः अतीताः इति। तदा भीष्मः किमर्थं हरिः देवानां राक्षसानां कृते देहं धृतवान् इति पुलस्त्यं पप्रच्छ । पुलस्त्यः उवाच –

हिरण्यकशिपोः वधानन्तरं बलिः यदा शासकोऽभूत् तदा देवानां राक्षसानां च सख्यं धृढतरम् आसीत् ।

भृगोः शापवशेन देवानां राक्षसानां मध्ये सार्वकालिकं वैरम् अप्रशाम्यम् उत्पन्नम् । अद्यावधिदेवानां हिताय द्वादशावतारान् धृतवान्। तेषु त्रिपुरासुरसंहारकथायां गोः रूपेण अवतीर्य सिद्धरसं सरः पीत्वा त्रिपुरदहने कारणमभूदिति पुलस्त्यः उक्तवान् । तावती कथा एव त्रिपुरासुरवधसम्बन्धिनी अत्र दृष्टा । तत्र तारकामयः सङ्ग्रामः त्रिपुरदाहनिमित्तकः ।

### 2. सृष्टिखण्डे गणेशमाहात्म्य वर्णने त्रिपुरासुरसङ्ग्रामकथा प्रस्तावः दृश्यते।

सृष्टिखण्डे गणेशमाहात्म्य वर्णने त्रिपुरासुरसङ्ग्रामकथा प्रस्तावः दृश्यते। त्रिपुरः इति नाम्ना कश्चन राक्षसः त्रिपुराणाम् एक एव शासक न तु त्रयोराक्षसाः पुरत्रयस्य प्रत्येकमधीशाः । महेश्वरेण त्रिषु पुरेषु दग्धेषु त्रिपुरासुरस्य पुत्रः कथञ्चित् रक्षितः । सः विनायकमभियोद्धुं रणभूमिम् आगतः विनायकं प्रति अधिक्षेपवाक्येषु त्रिपुरासुरपुत्रः विनायकमेवं जगाद "क्रूरेण तव पित्रा मम पिता पुरत्रयेण सह मारितः । अहं शिवस्य पुत्रं त्वां हत्वा पितृऋणात् मुक्तो भविष्यामि" इति । तस्य वाक्यानि श्रुत्वा गणेशः एवमुक्तवान् – "तव जनकः त्रिपुरासुरः सुराणामहितं कृत्वा पापिष्ठोऽभूत् महेश्वरः मे पिता ज्ञानबलेन तव पितरं हत्वा एकेन शरेण पुरत्रयं दग्ध्वा तं पापात् मोचितवान् अहमपि त्वां हनिष्ये" इति ।

तव तातेन दुष्टेन सुराणामहितं पुरा ।
कृतं कर्म महत्पापं श्रुतं नो जनकेन हि ॥[2]

पापकर्मरतं दृष्टं ज्ञात्वा ज्ञानबलेन च ।
अवधीत्तं शरैकेन पितरं ते बलेन च ॥[3]

पङ्कात्प्रतारितो मोहात्प्रेषितो यममन्दिरम् ।
त्वां चाहं तत्पथं दैत्य प्रेषयामि क्षणादिह ॥[4]

**3. स्वर्गखण्डे ज्वालेश्वर तीर्थोत्पत्तिवर्णने त्रिपुरदाहकथा वर्णिता ।**

नर्मदा तीरे कावेरीनर्मदा सङ्गमे स्थितं महेश्वरं द्रष्टुं देवाः ऋषयश्च आगताः ।

ईश्वरः तेषां स्वागतं व्याहृत्य आगमनकारणं पप्रच्छ ।

ऋषयः देवम् एवमूचुः – बलिपुत्रः बाणासुरः त्रिपुरनामकं पुरं निर्माय गगने चरति तस्मात् भीताः वयं त्वां शरणं गताः । अत्र मुनिवाक्येषु त्रिपुरं पुरमिति दृश्यते, तदानीं त्रिपुरनामकं पुरमिति अर्थः प्रतीयते । किन्तु समनन्तर कथायां पुरदहने एकं पुरं श्रीशैले द्वितीयं नर्मदा तीरे तृतीयं नर्मदाकावेरी सङ्गमे पतितमिति वर्णनात् पुरत्रयसमाहारः भवति। तत्पुरत्रयं बाणः एक एव एकपुरवत् प्रशास्ति इत्यन्वयोऽपि ज्ञेयः । अन्यथा पुरत्रय पतने अन्वयः न भवत्येव । ऋषयः ऊचुः –

अपि घोरो महावीर्यो दानवो बलदर्पितः ।
बाणो नामेति विख्यातो यस्य वै त्रिपुरं पुम् ॥[5]

गगने तु वसेद्दिव्यं भ्रमते तस्य तेजसा ।
तस्माद् भीता विरूपाक्ष त्वामेव शरणं गताः ॥[6]

त्रायस्व महतो दुःखाद् देवत्वं हि परागतिः ।
एवं प्रसादं देवेश सर्वेषां कर्तुमर्हसि ॥[7]

येन देवाः सुप्रसन्नाः सुखमेधन्ति शङ्कर ।
परां निर्वृति मायान्ति तत्प्रभो कर्तुमर्हसि ॥[8]

ईश्वरोऽपि तान् आश्वास्य तद् वधोपायं प्रति चिन्तापरोऽभूत् ।

**4. परमेश्वर नारद संवादः**

नारदः ईश्वरेण स्मृतः, ईश्वरः बाणस्य अवध्यत्वे त्रिपुरस्य अजय्यत्वे कारणं दृष्टवान् । बाणस्य नगरे स्त्रियः सर्वाः पतिव्रताः तस्य भार्या अनौपम्या नाम्नी तस्याः पातिव्रत्येन स तथा रक्षितो भवति । तस्याः पातिव्रत्ये भग्ने त्रिपुरं दाह्यं भवतीति शिवः निश्चिकाय, तमेवार्थं नारदमुवाच ।

शिवादिष्टः नारदः बाणासुर नगरं जगाम । बाणोऽपि आगतं नारदं दृष्ट्वा योग्योऽयं आगतः मानवलोके कैः उपायैः देवाः प्रीताः भवन्ति इति अयं जानाति इति भार्यामुवाच । अनौपम्या अपि तमेवार्थं नारदं पप्रच्छ । नारदः तिलधेनु दानेन देवाः तुष्यन्ति, वेदपारग ब्राह्मणाय तिलधेनुः देया, तच्च दानं भूमण्डलदानेन तुल्यं भवति इत्युक्त्वा केषु दिवसेषु तत् दानं कर्तव्यमिति स्पष्टीकृतवान् ।

अनौपम्योवाच –

भगवन्मानुषे लोके देवास्तुष्यन्ति केन व ।
व्रतेन नियमेनापि दानेन तपसाऽथवा ॥[9]

नारद उवाच –

तिलधेनुं च यो दद्याद् ब्राह्मणे वेदपारगे ।
ससागरा नवद्वीपा दत्ता भवति मेदिनी ॥[10]

अष्टमी च चतुर्थी च द्वादशी च तथा उभे ।
सङ्क्रान्तिर्विषिवं चैव दिनच्छिद्रमुखं तथा ॥[11]

पुण्यान्येतानि सर्वाणि उपवसन्ति याः स्त्रियः ।
तासां तु धर्म्ययुक्तानां स्वर्गे वासो न संशयः ॥[12]

अनौपम्या नारदमेव दानं गृहण तिलधेनुना सह प्रभूतं सुवर्णादिकं दास्यामि इत्यवदत् । नारदः अहं शीलसम्पन्नः भक्तितत्परः न मे धनेन किञ्चित् प्रयोजनं अन्यस्मै क्षीणवृत्तये ब्राह्मणाय दानं देयमिति उक्त्वा निर्गतः । यदा तासु भर्तुः अन्या चिन्ता प्रविष्टा तासां शीलं छिन्नमभूत्।

एवं तासां मनो हृत्वा सर्वासामुपदिश्य वा ।
जगाम भरतश्रेष्ठ ! स्वकीयं स्थानकं पुनः ॥[13]

अन्याकृष्टमनास्तास्तु अन्यत्र गतमानसाः ।
परिच्छिद्रं समुत्पन्नं बाणस्य तु महात्मनः ॥[14]

**5. शिवस्य रथवर्णनम्**

पञ्चदशे अध्याये शिवस्य रथसन्नाहः वर्णितः । नर्मदातीरे महेश्वरनामकस्थाने शिवः रथसम्पादने कृतयत्नः मन्दरपर्वतः गाण्डीवं कृतः, गाण्डीवमिति धनुषः संज्ञा। गाण्डीवशब्दः अर्जुन धनुषि लोके व्यवहृतः । इदं धनुः महेश्वरात् वरुणः वरुणात् अग्निः प्राप्तवान् । अग्निः खण्डवदहने अर्जुनाय दत्तवान् । षष्ठिवत्सरेषु पूर्णेषु गाण्डीवं पुनः शिवसमीपं गतमिति महाभारते माहापास्थानिक पर्वणि दृश्यते । गाण्डी शब्दः दृढ वंश वाचकः गाण्ड्यजगात्संज्ञायाम् (5-2-110) इति वा प्रत्ययः मत्वर्थीयः गाण्डिवं अजगवं इति ईश्वर धनुषः पिनाकस्य पर्याय वाचकौ। वासुकिः ज्यास्थाने नियुक्तः । स्थानं वैशाखं कृत्वा इति शब्दस्यार्थः न ज्ञातः । ततः विष्णुं शरं कृत्वा शराग्रे अग्निं मुखे वायुं च नियोजितवान्। अश्विनौ चक्राङ्गौ अक्षे स्वयं विष्णुः चापाग्रे इन्द्रः बाणे कुबेरः इत्येते स्थापिताः । दक्षिणहस्ते यमः वामहस्ते कालपुरुषः स्थितौ ब्रह्मा स्वयं सारथिरभूत् । यदा त्रीणिपुराणि अन्तरिक्षे समेतानि बभूवुः तदा त्रिशल्येन बाणेन रुद्रः तानि बिभेद ।

**6. त्रिपुरस्त्रीणां शीलभ्रंश कारणेन तत्रस्थानां राक्षसानां तेजः बलं च विशीर्णमासीत्।**

सहस्राधिकाः उत्पाताः त्रिपुरेषु प्रादुर्भूताः । त्रिपुरस्य कालः आसन्नः आसीत् । दिशः अट्टहासं मुञ्चन्ति स्म, दिक्षु काष्ठानां वर्षः अभूत् चित्ररूपेण तत्रस्थानां निमेषः उन्मेषश्चाभूत् । स्वप्ने तत्रस्थाः जनाः आत्मनः रक्तलिप्तान् पश्यन्ति स्म । एवं बहवो विपरीताः त्रिपुरवासिभिः दृष्टाः । संवर्तकनाम वायुः युगान्त वातसदृशः प्रवृत्तः । बुद्धिः हरक्रोधेन नाशिता । बलं च नष्टम् । पादपाः स्वयं ज्वलन्ति स्म, शिरस्सु अग्निः निहितः इव ते पीडां अन्वभूवन् । विना प्रत्यत्नेन सर्वे हाहाकारान् कृत्वा व्याकुली भूताः । प्रासादानां शिखराणि पतन्ति स्म । हरबाणाग्निना आरामाः सर्वे दग्धाः । एवं दीप्ते हव्यवाहने दशसु दिक्षु शिलावर्षोऽभूत्। सर्वं

तत् पुरं किंशुकैः आक्रान्तमिव आसीत् । द्रुमखण्डेषु जनस्थानेषु देवागारेषु अग्निः सर्वत्र व्याप्तः । अङ्गराणां राशयः गिरिकूटाः इव सर्वत्र दृष्टाः । शतशः सहस्रशः च दग्धाः । एवं हरकोपेन प्रेरितः अग्निः सर्वं दग्धं चकार ।

**7. त्रिपुरस्त्रियः धूमपीडिताः अग्निमेव निनिन्दुः ।**

ततः त्रिपुरस्त्रियः धूमपीडिताः अग्निमेव निनिन्दुः । यद्यस्माकं पुरुषैः अपराद्धं तदा अस्माभिः किं कृतम् । ते दाक्षिण्यं लज्जा वा किं नास्ति इत्यनेकधा शिवं अग्निं च दूषयामासुः –

पाप ! निर्दय निर्लज्ज ! कस्ते कोपोऽङ्गनासु वै ।
न दाक्षिण्यं न ते लज्जा न सत्यं शौचवर्तिता ॥[15]

अनेकरूपवर्णाढ्या उपलभ्या वदस्व ह ।
किं त्वया न श्रुतं लोके अवध्याः सर्वयोषितः ॥[16]

एवं त्रिपुरयुवतिभिः निन्दितः अग्निरपि ताः एवमुवाच – "त्रिपुरदहने अहम् न स्वतन्त्रः स्वयं च न प्रवृत्तः महेश्वरस्य आदेशकर्ता महेश्वरेण मयि विसृष्टं क्रोधं युष्मासु दर्शयन् विजृम्भितोऽस्मि" इति ।

**8. बाणेन कृता ईश्वरस्तुतिः**

स्त्रीणां दुरवस्थां दृष्ट्वा बाणः अल्पसेना अवशिष्टः ईश्वरमेव शरणं गत्वा नाहं कृतापराधः, देवाः मह्यं असूयिताः मामेवं अपराधिनं त्वयि वदन्ति । अद्यावधि शिवलिङ्गे बाणचिह्नं मम भक्तिसूचकं वर्तते । तव आग्रहदग्धः बाणः नष्टः चेत् तत् चिह्नं नष्टं भवतीति बहुधा विलपन् ईश्वरमेवं स्तुतवान् ।

न निवर्तति यन्ममपापगतिः शुचिकर्मविशुद्धमपि त्यजति ।
अनुकम्पति दिग्भ्रमति भ्रमति भ्रम एष कुबुद्धि निवारयति ॥[17]
शिवं प्रति बाणोक्तिरपि पद्मपुराणे एवं दृश्यते ।

**9. महेश्वरः बाणाय दीर्घायुषं दत्वा दहनव्यापारात् अग्निं निवर्तयामास।**

बाणेन एवं प्रसादितः महेश्वरः तस्मै दीर्घायुषं दत्वा दहन व्यापारात् अग्निं निवर्तयामास । दग्धशेषं पुरत्रयं रक्षित्वा एकं पुरं श्रीशैलक्षेत्रे त्रिपुरान्तके पातितः । द्वितीयं पुरं अमरकण्टके पातितम् । तृतीयं रक्षितं अद्यापि गगने भ्रमति । एतानि त्रीणि पुराणि अद्यापि शैवक्षेत्राणि प्रसिद्धानि । अमरकण्टकक्षेत्रम् अद्यतन मध्यप्रदेशराष्ट्रे विन्ध्यपर्वतेषु नर्मदायाः जन्मभूमिः वर्तते । मध्यप्रदेश राजधानी नगरात् भोपाल् पत्तनात् नातिदूरे वर्तते । श्रीशैले त्रिपुरान्तके इति यद्यपि भिन्नं दृष्टं तथापि अद्यतन आन्ध्रप्रदेशे ओङ्गोल् मण्डले त्रिपुरान्तकं क्षेत्रं मार्कापुरं समीपे वर्तते । तच्च क्षेत्रं श्रीशैलस्य प्राक् द्वारमिति प्रसिद्धम् । श्रीशैलस्य एकदेशरूपेण परिगण्यते । तत्रापि कदम्ब वनवासिनी देवी वसति । अतः श्रीशैले त्रिपुरान्तके इति एकं क्षेत्रम् ।

तृतीयं रक्षितं तस्य शङ्करेण महात्मना ।
भ्रमते गगने नित्यं रुद्रतेजः प्रभावतः ॥[18]

एवं तु त्रिपुरं दग्धं शङ्करेण महात्मना ।
ज्वालामालाप्रदीप्तं तु पतितं धरणीतले ॥[19]

एकं निपातितं तस्य श्रीशैले त्रिपुरान्तके ।
द्वितीयं पातितं तत्र पर्वतेऽमरकण्टके ॥[20]

दग्धे तु त्रिपुरे राजन् रुद्रकोटिः प्रतिष्ठिता ।

ज्वलन्तं पातितं तत्र तेन ज्वालेश्वरः स्मृतः ॥[21]

**10. ज्वालेश्वरमाहात्म्यवर्णनम्**

या च ज्वाला ऊर्ध्वमुखं प्रस्थिता तया लोकाः दग्धाः मा भूवन् इति रुद्रः तामपि ज्वालां अमरकण्टकपर्वते स्तब्धं चकार । यः अमरकण्टक पर्वतं गत्वा तत्र स्तम्भरूपं लिङ्गं दृष्ट्वा तम् अर्चयति सः वर्षकोटिसहस्रं राजा भूत्वा भूलोकं पालयति इति फलश्रुतिरपि आख्यानान्ते निरुपिता । अपि च बहूनां यागकर्मणां च फलं प्राप्नोति इति ज्वालेश्वरमाहात्म्य वर्णने त्रिपुरासुरसंहारोपाख्यानं वर्णितम् ।

तत्र स्नात्वा दिवं यान्ति ये मृतास्तेऽपुनर्भवाः ।
ज्वालेश्वरे महाराज ! यस्तु प्राणान्परित्यजेत् ॥[22]

चन्द्रसूर्योपरागे तु भक्त्यापि श्रुणु तत्फलम् ।
अमरा नाम देवास्ते पर्वतेऽमरकण्टके ॥[23]

रुद्रलोकमवाप्नोति यावदाभूतसम्प्लवम् ।
अमरेश्वरस्य देवस्य पर्वतस्य तटे जले ॥[24]

कोटिश ऋषिमुख्यास्ते तपस्तप्यन्ति सुव्रताः ।
समन्ताद्योजनं राजन्क्षेत्रं चामरकण्टकम् ॥[25]

अकामो वा सकामो वा नर्मदायां शुभे जले ।
स्नात्वा मुच्येत पापेभ्यो रुद्रलोकं स गच्छसि ॥[26]

**उपसंहारः**

**"सत्ये सर्वं प्रतिष्ठितम्"**

इति वाक्यं मुण्डकोपनिषत् मध्ये अस्ति । लोके सत्यस्य प्राधान्यमितरामस्ति । सत्यवाक्यपालनेन सर्वाणि सिध्यन्ते । धर्मार्थकाममोक्ष जीवनमेव मानवजीवनपरमार्थः । चतुर्विधपुरुषार्थ साधनमेव मानवजीवनपरमार्थः ।

धर्मबद्धपालनं यः मनुजः अनुसरति, तस्य जीवनम् इतरां समुन्नतं भवति । किन्तु आधुनिककाले जनाः सत्यदूराः भूत्वा धर्मभ्रष्ठाः अभवन्। तत् कारणात् समाजे अनेके दुष्कर्माणि प्रचलन्ति । तानि दूरीकरणाय पद्मपुराणानुसारं धर्मसत्यस्य वैशिष्ठ्यं यथामति अस्मिन् शोधपत्रे मया परिशीलिताः ।

अष्टादशपुराणसारम् –

"परोपकारः पुण्याय पापाय परपीडनम्" इति व्यासस्य वचनद्वयं सदा स्मरणीयम् ।

## सन्दर्भ – सङ्केताः

1. देवीभागवतम् – 1-2-3 श्लो
2. पद्मपुराणम् – सृष्टिखण्डे – 76/4 श्लो
3. पद्मपुराणम् - सृष्टिखण्डे – 76/5 श्लो
4. पद्मपुराणम् - सृष्टिखण्डे – 76/6 श्लो
5. पद्मपुराणम् - स्वर्गखण्डे – 14/9 श्लो
6. पद्मपुराणम् - स्वर्गखण्डे – 14/10 श्लो
7. पद्मपुराणम् - स्वर्गखण्डे – 14/11 श्लो
8. पद्मपुराणम् - स्वर्गखण्डे – 14/12 श्लो
9. पद्मपुराणम् - स्वर्गखण्डे – 14/28 श्लो
10. पद्मपुराणम् - स्वर्गखण्डे – 14/29 श्लो
11. पद्मपुराणम् - स्वर्गखण्डे – 14/32 श्लो
12. पद्मपुराणम् - स्वर्गखण्डे – 14/33 श्लो
13. पद्मपुराणम् - स्वर्गखण्डे – 14/39 श्लो
14. पद्मपुराणम् - स्वर्गखण्डे – 14/40 श्लो
15. पद्मपुराणम् - स्वर्गखण्डे – 15/37 श्लो
16. पद्मपुराणम् - स्वर्गखण्डे – 15/38 श्लो
17. पद्मपुराणम् - स्वर्गखण्डे – 15/60 श्लो
18. पद्मपुराणम् - स्वर्गखण्डे – 15/66 श्लो
19. पद्मपुराणम् - स्वर्गखण्डे – 15/67 श्लो
20. पद्मपुराणम् - स्वर्गखण्डे – 15/68 श्लो
21. पद्मपुराणम् - स्वर्गखण्डे – 15/69 श्लो
22. पद्मपुराणम् - स्वर्गखण्डे – 15/78 श्लो
23. पद्मपुराणम् - स्वर्गखण्डे – 15/79 श्लो
24. पद्मपुराणम् - स्वर्गखण्डे – 15/80 श्लो
25. पद्मपुराणम् - स्वर्गखण्डे – 15/81 श्लो
26. पद्मपुराणम् - स्वर्गखण्डे – 15/82 श्लो

## उपयुक्तग्रन्थसूची


1. वेदव्यासमहर्षिः – पद्मपुराणम् – गोपाल प्रिण्टिङ्ग् वर्क्स् कलकत्ता – 1957
2. बलदेवोपाध्यायः - पुराणविमर्शः - चौखम्बासंस्कृतविद्याभवन् वारणासी – 1969
3. वेदव्यासमहर्षिः - श्रीदेवीभागवतम् - वी.जी.यस्.पब्लिषर्स् (तेलुगुवचनम्) विजयवाडा – 2003


व्याख्याता बेतवोलु रामब्रह्मम